अन्तर्ज्जलगतं सम्यक् ततः शुद्धिं विनिर्द्दिशेत्”॥ अत्र मज्जनसमकालगमनाभिधानात् शरमोक्षसमकालं गमनं शूलपाण्युक्तमयुक्तम्। मज्जनसमकालक्षिप्तं मध्यमं शरमादायेत्यपरमुक्तमपि प्रमाणशून्यम्। ततश्च त्रिषु शरेषु मुक्तेषु एको वेगवान् मध्यमशरपतनस्थानं गत्वा तमादाय तत्रैव तिष्ठति। अन्यस्तु पुरुषो वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति एवं स्थितयोस्तृतीयायां करतालिकायां प्राड्विवाकदत्तायां शोध्यो निमज्जति तत्समकालमेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशरपतनस्थानं गच्छति शरग्राही च तस्मिन् प्राप्ते द्रुततरं तोरणमूलं प्राप्यान्तर्ज्जलगतं यदि न पश्यति तदा शुद्धो भवतीति वर्त्तुलार्थः॥ *॥ *॥ तत्र प्रयोगः। उक्तलक्षणजलाशयनिकटे तथा तोरणं विधाय उक्तदेशे लक्ष्यं कृत्वा तोरणसमीपे सशरं धनुः संपूज्य जलाशये वरुणमावाह्य पूजयित्वा तत्तीरे धर्म्मादींश्च देवान् हवनान्तमिष्ट्वा दक्षिणां कृत्वा शोध्यस्य शिरसि प्रतिज्ञापत्रं बद्धा प्राड्विवाको जलमभिमन्त्रयेत्। वक्ष्यमाणमन्त्रेण।

ॐ “तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्।
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा॥
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे”। इति॥

शोध्यस्तु ॐ “सत्येन माभिरक्षस्व वरुण” इत्यनेन जलमभिमन्त्र्य गृहीतस्थूणस्य शोध्यनाभिमात्रोदकावस्थितस्य बलीयसः प्राङ्मुखस्य पुरुषस्य समीपं जलमध्ये गच्छेत्। ततः शरेषु त्रिषु मुक्तेषु मध्यमशरपातस्थाने मध्यमशरं गृहीत्वा जविन्येकस्मिन् पुरुषे स्थिते अन्यस्मिंश्च तोरणमूलस्थिते प्राड्विवाकेन तालत्रये दत्ते शोध्यो गृहीतस्थूणप्राङ्मुखपुरुषस्योरू गृहीत्वा निमज्जति तत्समकालमेव तोरणमूलस्थोऽपि मध्यमशरस्थानं द्रुतं गच्छति। ततः शरग्राही च तस्मिन् प्राप्ते द्रुतं तोरणमूलं प्राप्य जलान्तःस्थं यदि न पश्यति तदा शुद्धः। कर्णाद्यङ्गं विना शिरोमात्रदर्शनेऽपि शुद्धः। मज्जनस्थानादन्यत्रगमनेऽप्यशुद्धः। ततो दक्षिणादिकं दद्यात्”। इति दिव्यतत्त्वम्॥

उदकीर्णः, पुं, (उदेन जलेन कीर्णः व्याप्तः।) महाकरञ्जः। इति राजनिर्घण्टः॥

उदकीर्य्यः, पुं, (उदेन कीर्य्यः।) करञ्जविशेषः। इति रत्नमाला॥ डालकरमूचा डहरकरञ्ज इत्यादि भाषा। (अस्योक्तः पर्य्यायो भावप्रकाशे।
“उदकीर्य्यस्तृतीयोऽन्यः षड्ग्रन्था हरिवारुणी।
मर्कटी वायसी चापि करञ्जी करभञ्जिका”॥
गुणा अस्य करञ्जीशब्दे ज्ञातव्याः॥)

उदक्या, स्त्री, (उदकं जलं शुद्धिस्नानार्थमर्हतीति। उदक + संज्ञायामिति यत्।) रजस्वला। ऋतुमती। इत्यमरः॥ (यथा, मनुः। ४।५७।
“नोदक्ययाभिभाषेत यज्ञं गच्छेन्नचावृतः”॥)

उदगद्रिः, पुं, (उदगुत्तरे योऽद्रिः।) हिमालयपर्व्वतः। इति हेमचन्द्रः॥

उदगयनं, क्ली, (उदक् उत्तरस्यामयनं गमनम्।) उत्तरायणम्। इति स्मृतिः॥ (यथा, मनुः।१।६७।
“दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः।
अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम्”॥
“तदादित्यस्योदगयनमादानञ्च त्रीनृतून् शिशिरादीन् ग्रीष्मान्तान् व्यवस्येत्”॥ इति सूत्रस्थाने षष्ठेऽध्याये चरकेणोक्तम्। विस्तरश्चास्योत्तरायणशब्दे ज्ञेयः॥)

उदग्भूमः, पुं, (उदगुत्तरदिग्वत् प्रशस्ता भूमिर्यत्र। समासे + अच्।) सद्भूमिः। उत्कृष्टस्थानम्। इति जटाधरः॥

उदग्रं, त्रि, (उद्गतमग्रं यस्य।) उच्छ्रितम्। उच्चम्। इत्यमरः॥ (विशालम्। महत्। दीर्घम्। भीमम्।
“नयन् मधुलिहः श्वैत्यमुदग्रदशनांशुभिः”॥
इति माघः। २। २१। तथा, रघुः। २। ५३।
“क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः”। “अवन्तिनाथोऽयमुदग्रबाहुः”॥ इति च रघुः। ६। ३२॥)

उदग्रदन्, [त्] पुं, (उदग्रौ दन्तौ यस्य। अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चेति दन्तस्य दतृ॥) उच्चदन्तहस्ती। वृहद्दन्तयुक्ते, त्रि। इति हेमचन्द्रः॥

उदजः, पुं, (उत् + अज् + समुदोरजःपशुष्विति अप्। अघञपोरिति पर्य्युदासात् वीभावो न।) पशुप्रेरणम्। इत्यमरः॥

उदञ्चनं, क्ली, (उत् + अञ्च + ल्युट्।) पिधानपात्रम्। इति हेमचन्द्रः॥ ढाकुनि इति भाषा। (यथा, शतपथब्राह्मणे। ४। ३। ५। “प्रतिप्रस्थाता संस्रवावानयत्युन्नेता चमसेन वोदञ्चनेन वा”।) ऊर्द्ध्वक्षेपणम्॥

उदञ्चितं, त्रि, (उत् + अञ्च + क्त।) ऊर्द्ध्वक्षिप्तम्। इति हेमचन्द्रः॥ (“उदञ्चिताक्षोऽञ्चितदक्षिणोरुः”। इति भट्टिः॥ (पूजितम्॥)

उदण्डपालः, पुं, (उदण्डस्य उद्भिन्नाण्डस्य पालो गमनं पलायनं यत्र। मत्स्यसर्पविशेषाणामण्डं उद्भिन्नं सत्पलायते इति प्रसिद्धिः।) मत्स्यविशेषः। सर्पभेदः। इति मेदिनी॥

उदधिः, पुं, (उदानि उदकानि वा धीयन्तेऽस्मिन्। उद + वा उदक + धा + कि।) समुद्रः। इत्यमरः॥ (“उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्”। इति रघुः ८। ८॥ मेघः। घटः॥)

उदधिक्राः, पुं, (उदधि + क्रम + विट्।) समुद्राक्रमणकर्त्ता। इति व्याकरणम्॥

उदधिमलः, पुं, (उदधेः समुद्रस्य मल इव॥) समुद्रफेनः। अस्य गुणाः। शीतलत्वम्। कषायत्वम्। अतिवान्तिकारित्वञ्च। इति राजवल्लभः॥

उदधिमेखला, स्त्री, (उदधिर्मेखलेव यस्याः॥) पृथिवी। इति महाभारतम्॥ (“चतुरुदधिमालामेखलाया भुवो भर्त्ता”। इति कादम्बरीकथामुखे।)

उदन्तः, पुं, (उद्गतो निर्गतः अन्तो यस्य।) वार्त्ता। (“कान्तोदन्तः सुहृदुपगतः सङ्गमात्किञ्चिदूनः”॥ इति मेघदूते” १०१। तथा, रघुः।१२। ६६।
“श्रुत्वा रामः प्रियोदन्तं मेने तत्सङ्गमोत्सुकः”)
साधुः। इति मेदिनी॥ वृत्तियाजनम्। इति शब्दरत्नावली॥ (पाकवशात् प्राप्तान्ते, त्रि। यथा, शतपथब्राह्मणे। “शृतमसदिति तदाङ्गर्यह्युदन्तं तर्हि जुहुयात् तद्धैनोदन्तं कुर्य्यादुप ह दहेत् यद्यदन्तं कुर्य्यादप्रजज्ञि वै रेत उपदग्धं तस्मान्नोदन्तं कुर्य्यात्”॥)

उदन्तकः, पुं, (उदन्त + स्वार्थे कन्।) वृत्तान्तः। वार्त्ता। इति शब्दरत्नावली॥

उदन्तिका, स्त्री, (उत् + अन्त + णिच् + ण्वुल् + टाप्।) तृप्तिः। इति हारावली॥

उदन्या, स्त्री, (उदन्यति उदकस्येच्छा वा। सुपः आत्मनः क्यच्। अशनायोदन्येति ईत्वाभावः क्यचि उदकस्योदन्भावोऽपि निपात्यते। अप्रत्ययादित्यः।) पिपासा। इत्यमरः॥ (यथा छान्दोग्योपनिषदि। ६। ८। ५। “अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनायः इत्येवं तत्तेज आचष्ट उदन्येति”॥)

उदन्वान्, [त्] पुं, (उदकानि सन्त्यत्र। उदक + मतुप्। उदन्वानुदधौ चेत्युदकस्य उदन्भावो निपातितः मतुपि।) समुद्रः। इत्यमरः॥ (यथा रघुः ४। ५२॥
“असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता”।
ऋषिविशेषः। इति पाणिनिः। ८।२।१३॥)

उदप आघाते। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (परं-सकं-सेट्।) पञ्चमस्वरादिः। उदपः। इति दुर्गादासः॥ पानुबन्ध उदधातुरयं भ्रमवशात् उदपेति लिखितः॥

उदपानं, क्ली, पुं, (उदकं पीयतेऽस्मिन्। उदक + पा + अधिकरणे + ल्युट्, उदकस्य उदः।) कूपः। इत्यमरः॥
(“तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च”।
इति मनुः २।४८। तथा, रामायणे २।८०।१२॥
“निर्जलेषु च देशेषु खनयामासुरुत्तमान्।
उदपानान् बहुविधान् वेदिकापरिमण्डितान्”॥
भावे ल्युट्। जलपानम्। यथा गीतायाम्। २।४६
“यावानर्थ उदपाने सर्व्वतः संप्लुतोदके”॥)

उदयः, पुं, (उद्यन्ति ग्रहा यस्मात्। उत् + इ + अच्।) पूर्व्वपर्व्वतः। उदयाचलः। (भावे + अच्।) समुन्नतिः। इति मेदिनी॥ दीप्तिः। मङ्गलम्। इति शब्दरत्नावली॥ ग्रहाणामुद्गमः। तत्र सूर्य्यस्योदयविवरणं यथा, विष्णुपुराणे २ अंशे ८ अध्यायः॥ *॥
“उदयास्तमने चैव सर्व्वकालन्तु संमुखे।
दिशास्वशेषासु तथा मैत्रेय विदिशासु च॥१३॥
यैर्यत्र दृश्यते भास्वान् स तेषामुदयः स्मृतः।
तिरोभावञ्च यत्रैति तत्रैवास्तमनं रवेः॥१४॥
नैवास्तमनमर्कस्य नोदयः सर्व्वदा सतः।
उदयास्तमनाख्यञ्च दर्शनादर्शनं रवेः॥१५॥
शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम्।
विकर्णौ द्वौ विकर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा॥१६॥
उदितो वर्द्धमानाभिरामध्याह्नात्तपन् रविः।
ततः परं ह्रसन्तीभिर्गोभिरस्तं निगच्छति॥१७॥
उदयास्तमनाभ्याञ्च स्मृते पूर्व्वापरे दिशौ।